वागालम्भेन उपवेश्य पुण्याहस्वस्त्यृद्धिमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आप्रणीताभ्यः कृत्वा दातुः समक्षं गत्वा मे पुत्त्रं देहीति भिक्षेत् ददानीतीतर आह तं परिगृह्णीत धर्म्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामीत्यथैनं वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यग्निमुखं कृत्वा पक्वा जुहोति यस्त्वा हृदा कीरिणा मन्यमान इति पुरोऽनुवाक्यमनूद्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोति अथ व्याहृतिभिर्हुत्वा स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् दक्षिणां दद्यात् एते च वाससी एते कुण्डले एतच्चाङ्गुरीयकमेवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आह स्म बौधायन इति ।*। एवमुक्तविध्यभावे परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं न त्वंशभागित्वमित्यग्रे वक्ष्यते । तथा च मनुः ।

'गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ॥'

एतेन दाढधने दानादेव पुत्त्रत्वनिवृत्तिद्वारा दत्त्रिमस्य स्वत्वनिवृत्तिर्द्विगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् संस्कुर्यात् स्वसुतान् पितेति स्मरणात् ग्रहणानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्य्या न पुनर्जनकेन कृतपूर्व्वा अपि निवर्त्तनीयाः ।*। यदि च तत्पूर्व्वभाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः ।*। एवमुपनयनमात्रकरणेऽपि प्रतिग्रहीतुर्दत्तकपुत्त्रसिद्धिः ।

'अन्यशाखोद्भवो दत्तः पुत्त्रश्चैवोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥'
इति वशिष्ठस्मरणात् ॥

एतच्चाष्टमाब्दरूपतन्मुख्यकालाभ्यन्तरवर्त्तिपरिग्रहे बोध्यम् । अन्यथा मुख्यकाले अधिकारयोग्यत्वाभावे गौणकाले अनधिकारान्न तत्सिद्धिरिति ।*। अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्त्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वं विशेषतो वक्ष्यते ।

'चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥'

एवञ्च चूडाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः ।*। तथा पैठीनसिः । अथ दत्तकक्रीतकृत्रिमपुत्त्रिकापुत्त्राः परपरिग्रहेणार्षेण येऽत्र जातास्तेऽसङ्गतकुलीना द्व्यामुष्यायणा भवन्तीति । आर्षेण अभ्युक्तेन परिग्रहेण । जनकग्रहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः ।*। अथ तत्कर्त्तृकश्राद्धनिर्णयः । तत्र पितुः सपिण्डीकरणान्तषोड़शश्राद्धे दत्तकस्य पूर्व्वगृहीतत्वेऽपि सत्यौरसे नाधिकारः । औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते । इति देवलेन ज्येष्ठत्वप्रतिषेधात् ।

'पिण्डदोंऽशहरश्चैषां पूर्व्वाभावे परः परः ।'
इति याज्ञवल्क्यवचनाच्च । अन्यच्च सर्व्वमौरसवत् । श्राद्धे तु विशेषो यथा जातूकर्ण्यः ।

'औरसक्षेत्रजौ पुत्त्रौ विधिना पार्व्वणेन तु ।
प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश ॥'

इतरे दत्तकादयः ।*। अथ दत्तकाशौचादिनिर्णयः । तत्र शुद्धदत्तकस्य तु जनककुले परस्परमशौचं नास्त्येव गोत्रनिवृत्ताशौचनिवृत्तेरर्थसिद्धत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति । ब्रह्मपुराणे ।

'दत्तकश्च स्वयं दत्तः कृत्रिमः क्रीत एव च ।
अपविद्धाश्च ये पुत्त्रा भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः ।
जनने मरणे चैव त्र्यहाशौचस्य भागिनः ॥'

पराशरः ।

'भिन्नगोत्रः सगोत्रो वा नीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्यहाशौचं विधीयते ॥'

तथा ।

'औरसं वर्जयित्वा च सर्व्ववर्णेषु सर्व्वदा ।
क्षेत्रजादिषु पुत्त्रेषु जातेषु च मृतेषु च ।
अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः ॥'

अथ दत्तकविभागः । मनुः ।

'पुत्त्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढ़ोत्पन्नोऽपविद्धश्च दायादा बान्धवास्तु षट् ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षड़्दायादबान्धवाः ॥'

बौधायनः ।

'औरसं पुत्त्रिकापुत्त्रं क्षेत्रजं दत्तकृत्रिमौ ।
गूढ़ञ्चैवापविद्धञ्च रिक्थभाजः प्रचक्षते ॥
कानीनञ्च सहोढ़ञ्च क्रीतं पौनर्भवन्तथा ।
स्वयं दत्तं निषादञ्च गोत्रभाजः प्रचक्षते ॥'

औरस-पुत्त्रिकापुत्त्र-क्षेत्रज-कानीन-गूढ़ोत्पन्नापविद्ध-सहोढ़-पौनर्भव-दत्तक-स्वयमुपागत-कृतक-क्रीतानभिधाय देवलः ।

'एते द्वादश पुत्त्रास्तु सन्तत्यर्थमुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्व्वेऽन्ये पितुरेव षट् ।
विशेषं वापि पुत्त्राणामानुपूर्व्व्याद्विशिष्यते ॥
सर्व्वे ह्यनौरसस्यैते पुत्त्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते ॥
तेषां सवर्णा ये पुत्त्रास्ते तृतीयांशभागिनः ।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥'*।

वशिष्ठः । तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । स प्रतिगृहीतपुत्त्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वशिष्ठोक्तो दत्तकविषयो ज्ञेयः । तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरनुत्कृष्टगुणदत्तकविषयो वाच्यः ।

'उपपन्नो गुणैः सर्व्वैः पुत्त्रो यस्य हि दत्त्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽप्यन्यगोत्रतः ॥'

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्याचारैः । तथा केनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तं तत् गुणवदगुणवद्भेदेन समाधेयं एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्व्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तं एतेनौरसस्य भ्रात्रादिधने येनैव भ्रातृत्वादिना सम्बन्धेन अधिकारित्वं तादृशेनैव सम्बन्धेन तादृशदत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्त्रान्तरसत्त्वे मृतपितृकदत्तकपौत्त्रस्यापि दत्तकोचितांशभागित्वम् । तदसत्त्वे सर्व्वहरत्वमपीति । न च पौत्त्रस्य स्वपितृयोग्यांशभागित्वं नियमात् दत्तकग्रहीतुः पितामहौरससत्त्वे तादृशपितृव्यतुल्यस्यैवांशस्य तद्योग्यत्वात् दत्तकपौत्त्रः पितृव्यतुल्यमेवांशं लभतामिति वाच्यम् । पुत्त्रकस्य दत्तकत्वे चतुर्थांशः पौत्त्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः शास्त्रसिद्धस्तस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एवं रीतिः प्रपौत्त्रेऽप्यनुसर्त्तव्येति ।*।

'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढ़ोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ॥
कानीनश्च सहोढ़श्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षड़िमे पुत्त्रपांसनाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥'

तथा ।

'न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।
पितॄणां शोधयेन्नित्यमौरसे तनये सति ॥' इति ।

एतावता प्रबन्धेनाभिहितो योऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

'दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्म्मो व्यवस्थितः ॥'

इति मनुवचनेन जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ।

'मृते पितरि कुर्य्युस्तं भ्रातरस्त्वर्द्धभागिनम् ।
अभ्रातृको हरेत् सर्व्वं दुहितॄणां सुतादृते ॥'

इति याज्ञवल्क्येन च दासीपुत्त्रस्याप्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन च दण्डापूपायितं सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशोऽसति तु तदर्द्धांशः अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशित्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टाधिकारस्य दासीपुत्त्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात् एवं सत्सु क्षेत्रजादिषु सत्येव पत्नीत्वयो-